अनुरा( दा )वर्तिना( नौ ) चैव स्यातां गर्भस्तयोः खलु। बलवान् ··· भवति BhelaS. 21. 26 (1.12)

**अनुदास** (anu-dāsa) *m.* slave, Bhavasantāraṇopaniṣad 2.35; cf. दासदासानुदास [VIŚVA.]

**अनुदासी** (anu-dāsī) *f.* female slave (indicating humility) प्रभोर्दासः पानीयाधिकृतस्तस्य पत्न्यहं दासानुदासी PrabaCin. 11. 19.

**अनुदासीन** (an-udāsīna) *adj.* [*f.* -ā] **I** not indifferent, active कुसुमपुराभियोगं प्रति अनुदासीनो राक्षसः MudrāRa. 2.7(4); प्रयत्नवन्तमात्मानमनुदासीनं कुर्वाणं व्यापारवन्तमवैति BhāvanāVi. 170. 3; **II** not detached बुद्धिरविशुद्धानुदासीना जडा चेति TattvVai. 64.26 (*on* 2.6)

**अनुदास्य** (anu-dāsya) *n.* servitude, service यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे BhāgP. v. 24. 25.

**अनुदाहरण** (an-udāharaṇa) *n.* **I** not an example (though desired to be so) एषाद्वे नञ्पूर्वे अनुदाहरणे अनुप इति प्रतिषेधात् MahāBh. iii. 326. 18 (*on* vii. 3. 47); **II** not a proper example, not serving as an example कुम्भवत्संचयमात्रं गन्धादयोऽपीत्यनुदाहरणं गन्धादय इति NyāyBh. 103. 9 (*on* ii. 1. 37); यदा पुनर्विपक्षमभ्युपैति तदाप्युदाहरणेनैव साधर्म्यान्नानुदाहरणेनेति NyāyVār. 122.15 (*on* i. 1. 34); साधनं प्रत्यभिज्ञानं सत्प्रयोगादि यन्मतम्। अनुदाहरणं सर्वभावानां क्षणभङ्गतः PramāVār. 1.269; फलार्थत्वादनुदाहरणमनतिदृश्यम् ṬupṬ. 2. 2 (*on* iv. 1. 2); वपायागस्य यागान्तरत्वे नास्ति प्रमाणम्। तस्माद्वेषोऽप्यनुदाहरणम् ṬupṬ. 9.16 (*on* iv. 1.18); TantrRa. 64.19; योगिनां तु चेतनत्वात् सर्वोत्कर्षनिमित्तं सर्वज्ञत्वमुपपन्नमित्यनुदाहरणम् BrahmSūBh.(Śaṅ.) 37. 18 (*on* i. 1.5); गन्धरसयोरनुदाहरणं त्रयाणामसंभवात्। न हि गन्धरसौ तेजसि स्तः। स्पर्शशब्दयोरनुदाहरणं विभागेन दर्शयितुमशक्यत्वात् ChāndoUBh. 359.9 (*on* vi. 4. 4); पचतितमामिति।··· इष्ठनोऽनुदाहरणे हेतुः Nyās. ii. 122.17 (*on* v. 3.56); साध्यसाधर्म्यग्रहणेन साधनविकलमनुदाहरणं भवतीत्युक्तं भवति TātpaṬ. (Vā.) 295 6 (*on* i. 1.36); अनुमानत्रयसाधारण्यादबाधितविषयत्वासत्प्रतिपक्षत्वयोः पृथगनुदाहरणम् Kiraṇā. 294. 18; न चाग्नेय्या सुब्रह्मण्यया इन्द्रः संस्कृतो भवत्यैन्द्र्या वाग्निः। अत एव न तन्त्रता। तेनोभावपि भेदेनाह्वातव्यावित्यनुदाहरणम् ŚāstrDī. 863.5 (*on* xii. 2. 7); इञो लुका विनाप्यौपगवीया इति च्छस्य सिद्धत्वाद् अनुदाहरणमेतत् Pradī. iv. 112B.35 (*on* iv. 1.90); तैलं भुक्तमिति ···। यदा तु जातिशब्दास्तैलादयस्तदा संस्थानप्रमाणनिरपेक्षा जातिसमाश्रयेण वर्तन्त इति — अनुदाहरणमेतत् Pradī. iv. 287B.21 (*on* v. 1.115); वृक्षा अत्रेति। अनुदाहरणमेतत् Pradī. v. 121B. 26 (*on* vi. 1. 108); अक्षहत इति। अनुदाहरणमेतदित्याहुः Pradī. v. 198A.14 (*on* vi. 2.52); साधकतयोपन्यस्तहेतोर्दृष्टान्तेऽनुदाहरणात् NyāyPari. 217. 9; दग्धस्यावेत्रबीजत्वेन दोषाणां विपरीतकार्यकारित्वं प्रत्यनुदाहरणात् SarvaDaSaṁ. 16.370; आक्षेपोदाहरणान्येतेषां मतेऽनुदाहरणान्येव RasGaṅ. 567. 14.

**अनुदाहरणता** (anudāharaṇa-tā) *f.* the state of being that which cannot serve as a proper example यदृच्छाशब्दानां तु देवदत्तादिसंकेतितव्यक्तिमात्रवाचित्वादनुदाहरणता स्पष्टैव MīmāKau. i. 135.24 (*on* i. 3. 30)

**अनुदाहरणत्व** (anudāharaṇa-tva) *n.* the state of being that which cannot serve or appear as a proper illustration उत्पत्तिवाक्यस्थस्याज्यादिपदस्य ··· अन्यतः सिद्ध्यपेक्षणादनुदाहरणत्वम् TantrVā. 288.17 (*on* i. 4. 3); 688.3 (*on* iii. 1.12); 1133. 7 (*on* iii. 7.11); एतेनोदाहरणाभासानामनुदाहरणत्वमुक्तं भवति NyāySā. 12. 16; न त्विदमेवाधिकरणम् ··· यज्ञोपवीतादेश्च प्रत्यक्षश्रुतिविहितत्वेनानुदाहरणत्वात् ŚāstrDī. 30.1 (*on* i. 3. 4); 245.15 (*on* iii. 3.7); दग्धस्यावेत्रबीजत्वेन दोषाणां विपरीतकार्यकारणतां प्रत्यनुदाहरणत्वात् TattvPradī.(Ci.) 62.1; वेदान्तरवदसम्यगभिधायकशाखाया अपि शाखान्तराधिकरणेऽनुदाहरणत्वमेव प्रसज्येत CaturCin. iii(1). 757. 20; पृथ्वादिषु टुशब्दस्योपदेशः, अत्रेत्संज्ञायां सत्यामवयवे कृतं लिङ्गं समुदायस्य विशेषकमिति समुदायादथुच्प्रसङ्गः। केवलस्यानुदाहरणत्वम्, इत्कार्याभावात् PadMañ. *on* KāśiVṛ. *on* P. i. 3.5; घटादीनां च मिथ्यात्वेनाङ्गीकृतानामनुदाहरणत्वात् NyāySu.(Ja.) 103A.3 (*on* i. 1.2); उक्तवचनानामनुदाहरणत्वे हेतुमाह Subodhi. 10. 4 (*on* 2. 21); BālamBha. ii. 26. 15 (*on* 2.21); यच्च शुक्तिः रूप्यमभवदित्यनुभवादर्शनमुक्तं, तच्छुक्तेरनुपादानत्वप्रयुक्तमिति तददर्शनस्यानुदाहरणत्वात् AdvaiSi. 762.3; न चात्र निवारणमनिष्टमापन्नमित्यनुदाहरणत्वं शङ्कनीयम् Kuval. 93(4); यववराहवेतसशब्दानां प्रियङ्गुवायसवृक्षेषु क्वापि देशे शिष्टैरप्रयोगादनुदाहरणत्वम् MīmāKau. i. 57. 22 (*on* i. 3.9); i. 135. 15 (*on* i. 3. 30); अच्छावाकचमसेन प्रातस्सवने तदानीमहोमादनुदाहरणत्वम् MīmāKau. ii. 282. 18 (*on* iii. 2. 29); ii. 367. 7 (*on* iii. 3. 14); संख्योदाहरणस्य 'त्रीन् परिधीन्' इति मन्त्रस्य ··· अपूर्वसाधनीभूतपरिधीयत्ताप्रकाशनार्थत्वस्य सिद्धत्वादनुदाहरणत्वम् BhāṭṭDī. iii. 54.12 (*on* ix. 1. 5); 'शुक्रं गृह्णाती'त्यस्य महाव्रतगतस्यानुदाहरणत्वम् ··· बाधसमुच्चयचिन्तायास्तत्रासंभवाद् इति चेन्न MayūMāli. 700. 3 (*on* x. 4. 2)

**अनुदाहरणत्वापत्ति** (anudāharaṇatvāpatti) *f.* undesired contingency of not being a proper illustration 'क्षमापणैकपदयोः पदयोः ···' 'निर्वासयन्तीं धृतिमङ्गनानाम् ···' प्रागुक्तपद्यद्वये शमत्वोदयत्वाभ्यां शमोदययोर्वाच्यत्वादनुदाहरणत्वापत्तेः RasGaṅ. 129. 10.

**अनुदाहरणत्वोक्ति** (anudāharaṇatvokti) *f.* statement about the state of not being a proper illustration अनयोः श्रौतत्वादनुदाहरणोक्तिरभ्युच्चयवादमात्रम् MīmāKau. i. 39. 4 (*on* i. 3. 7)

**अनुदाहरणसाधर्म्य** (anudāharaṇa-sādharmya) *n.* similarity to what is not a proper illustration उदाहरणसाधर्म्यग्रहणादनुदाहरणसाधर्म्यमर्थान्निराकृतं भवति NyāyVār. 122.4 (*on* i. 1.34)

**अनुदाहरणीयत्व** (anudāharṇīya-tva) *n.* the state of being that which is not to be cited as a proper illustration तरुदारुप्रभृतिषु नानाधारोऽवयव्यन्य एवारोप्यते येषु त्वारोप्यते ते ··· अनारब्धावयविषु तेष्वारब्धावयवितया विभ्रम्यते। मैवम्। तेषामनुदाहरणीयत्वात् KhaṇḍanKhā. 1142. 3; किमिदं विशेषस्मरणम्। जनिधातुग्रहणेनेति चेत्। तह्यात्मन आकाशस्संभूत इत्यादीनामनुदाहरणीयत्वं स्यात् NyāySu.(Ja.) 202A.13 (*on* i. 4. 6); 'त्यागः सप्तसमुद्र° ···' इति श्रीवत्सलाञ्छनोक्तमुदाहरणं परास्तम्। तस्य गुणीभूतव्यङ्ग्यत्वेन रसध्वनिप्रसङ्गेऽनुदाहरणीयत्वात् RasGaṅ. 48.1.

**अनुदाहार** (an-udāhāra) *adj.* without utterance, not capable of being spoken धर्मः ··· अनुदाहारः LaliVi. 25.0(6) [DBHS. under उदाहार]

**अनुदाहार्यता** (anudāhārya-tā) *f.* the state of being what is not fit to be cited नैषां चमत्कारे वैलक्षण्यमस्तीत्यनुदाहार्यतैव RasGaṅ. 388. 16.

**अनुदाहृत** (un-udāhṛta) *adj.* [*f.* -ā] not mentioned, not cited दुर्बलस्य कुतः प्रज्ञा पुरस्तादनुदाहृता MahāBhā. xii. 140.7; अनुदाहृतवाक्यान्तरपर्यालोचनायामपि प्रवृत्तस्त्वम् ŚrutaPra. iA. 40.32 (*on* i. 1.1); सर्वशब्देनानुदाहृतश्रुतिस्मृतीतिहासपुराणवचांसि तदनुग्राहकतर्कजातं च विवक्षितम् ŚrutaPra. ii. 656. 10 (*on* iv. 4.22); ii. 181. 28 (*on* i. 4. 20); वाक्यशेषश्च वार्त्तिके विशिष्यानुदाहृतोऽपि सामान्योक्त्यैवास्तीत्यनुमीयते MīmāKau. i. 72. 11 (*on* i. 3.9)

**अनुदाहृतत्व** (anudāhṛta-tva) *n.* the state of not being mentioned यत्तु भाष्यकारेण व्यपवर्गदर्शनमुक्तं तद्यदि दर्शपूर्णमासाविष्टैतदेवाभिप्रेतं ततः पुनरुक्तमथान्यत्तदप्यनुदाहृतत्वान्न ज्ञायते TantrVā. 637.11 (*on* ii. 4.7); भाष्ये तु व्यवस्थितविभाषाया अनुदाहृतत्वाद् उभयप्रयोगो लक्ष्यते DurghVṛ. *on* i.1.5; स यश्चायमिति वाक्योदाहरणं पूर्वं विषयवाक्यस्यानुदाहृतत्वात्कृतमशरीरत्वयुक्तिसूचनार्थं च TattvPrakā. 29B.4 (*on* i. 2. 1); यथोक्तदृक्सूत्रजदृष्टिपाताभावादिनाद्यैरनुदाहृतत्वात्। यच्चक्रचक्रार्धरवीन्दुभेदात्स्यात्क्रान्तिसाम्यं न हि पातसंज्ञम् SiddhāTaVi. 330. 21; अनुदाहृतत्वमप्यसिद्धम् MayūMāli. 94. 11 (*on* ii. 1.1)

**अनुदाहृति** (an-udāhṛti) *f.* **I** non-mention श्रुतेः सामान्यधर्माणां विशेषस्यानुदाहृतेः। अप्रतिष्ठं यदत्रैतज्ज्ञानं तत्संशयं विदुः Kāvyālaṅ.(Bh.) 4.17; हिरण्यश्मश्रुमूर्यादिमूर्तीनामनुदाहृतेः। अविरुद्धं निर्गुणत्वम् PañcDa. 9. 71; **II** non-acceptance परपक्षानुपादानं तद्वृत्तेश्चानुदाहृतौ। कथमन्यतरासिद्धहेत्वाभासव्यवस्थितिः Kāvyālaṅ.(Bh.) 5.23.

**अनुदाहृत्य** (an-udāhṛtya) *ger.* **A** not having cited यानि स्मृतिवचनान्यर्थनात्रमेव प्रतिपाद्य मूलभूताः श्रुतीरनुदाहृत्य निवृत्तव्यापाराणि TantrVā. 114. 4 (*on* i. 3.4); **B** not having mentioned or referred to भाष्यकारेण पूर्वं चमसमनुदाहृत्य चमसवदिति चेदिति सूत्रमुपन्यस्तम् TantrVā. 1039. 7 (*on* iii. 5. 9); 340.11 (*on* ii. 1.1)

**अनुदाह्रियमाणता** (anudāhriyamāṇa-tā) *f.* the state of being that which is not being mentioned उदाह्रियमाणतायामनुदाह्रियमाणतायां च कस्यचिदेतत् प्रत्यवस्थानमस्थाने KhaṇḍanKhā. 174.8.

**अनुदिग्धाङ्ग** (anudigdhāṅga) *adj.* whose body is besmeared with कुङ्कुमेनानुदिग्धाङ्गोऽगुरुणा गुरुणापि वा। लघूष्णैः प्रावृतः स्वप्यात् AṣṭāSaṁ. i. 15.19 (1. 4)

**अनुदित्** (an-udit) *adj.* (a verbal base) not having the indicatory vowel '*u*' नो व्यञ्जनस्यानुदितः SiddhaHe. iv. 2. 45.

**¹अनुदित** (án-udita) *adj.* [*f.* -ā] [P. vi. 1. 15] **AI** not uttered, not recited न नौ मन्त्रा अनुदितास एते मयस्करन् RV. x. 95. 1 (*but* PW., MW. unutterable, blamable); ŚatBr. XI. v. 1. 6; धास्युर्योनिं प्रथम आ विवेशा यो वाचमनुदितां चिकेत AV. v. 1. 2; नमो वाचे या चोदिता या चानुदिता TaiĀ. iv. 1. 1 (364.1); अनुदितामुदिता ससमुद्ये उद्यमानमुदिन(? ना) प्रसारिणा, वदिः APrāti. 217m; **AII** not mentioned यथैव यागेनेत्यनुदितं संबध्यते तथैवोदुम्बरेणेति TantrVā. 38. 13 (*on* i. 2. 19); **AIII** not asked अभिवल्लभधाम बद्धरागा ययावनुदितापि विदग्धदूती HarVi. 23. 48; **B** who does not invoke ऋषिक्रमेण स्वस्यैकार्षद्व्यार्षत्र्यार्षपञ्चार्ष-